MSS No. 209 Subject Philosophy

Name of MSS वेदान्तसार व्याख्या ; खंडित

Author — —

Period — — Folios 8

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios

209

Vedanta Sam

55

209

अतीतं द्वैतं यस्मात् तदतीतद्वैतं अतीतद्वैतभानतः ... तेसांतानतः ... तस्मात् = २

विरुद्धं ... परलोकं तुरीयं = १ ... मध्यितार्थ २

॥ श्रीः॥ ॐ स्वस्ति श्रीगणेशायनमः॥ अखंडं सच्चिदानंदमवाङ्मनसगोचरं आत्मानमखिलाधारमाश्रयेभी
ष्टसिद्धये १ अर्थतोप्यद्वयानंदानतीतद्वैतभानतः गुरूनाराध्य वेदांतसारं वक्ष्ये यथामति २ वेदांतो नाम उपनि
षत्प्रमाणं तदुपकारीणि च शारीरकसूत्रादीनि अस्य वेदांतप्रकरणत्वात्तदीयैरेवानुबंधैस्तद्वत्तासिद्धेर्न ते
पृथगालोचनीया तत्रानुबंधो नामाधिकारीविषयसंबंधप्रयोजनानि अधिकारी तु विधिवदधीतवेदवेदां
गत्वेनापाततोधिगताखिलवेदार्थोस्मिन् जन्मनि जन्मांतरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिक
प्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितांतनिर्मलस्वांतः साधनचतुष्टयसंपन्नः प्र
माता काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि निषिद्धानि नरकाद्यनिष्टसाधनानि ब्राह्मणहन
नादीनि नित्यान्यकरणे प्रत्यवायसाधनानि संध्यावंदनादीनि नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जा
तेष्ट्यादीनि प्रायश्चित्तानि पापक्षयसाधनानि चांद्रायणादीनि उपासनानि सगुणब्रह्मविषयमानसव्या
पाररूपाणि शांडिल्यविद्यादीनि एषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनं उपासनानां तु चित्तैकाग्र्यं परं प्र
योजनं विविदिषंतीत्यादिश्रुतेः तपसा कल्मषं हंति विद्ययामृतमश्नुत इत्यादिस्मृतेश्च नित्यनैमित्ति
कयोरुपासनानां चावांतरफलं पितृलोकसत्यलोकप्राप्तिः कर्मणा पितृलोको विद्यया देवलोक इति श्रुतेः

वे॰ सा॰ २

स॰ १

विद्यया ... देवस्य ... कल्पो
तपर्हत ... जोता ...

षट् षट्

साधनानि नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमदमादिसंपत्तिमुमुक्षुत्वानि नित्यानित्यव
स्तुविवेकस्तावत् ब्रह्मैवनित्यंवस्तु ततोन्यदखिलमनित्यमितिविवेचनं ऐहिकानां स्रक्चंदनादिविषयभो
गानां कर्मजन्यतयाऽनित्यत्वात् आमुष्मिकाणामप्यमृतादिविषयभोगानामनित्यत्वात्तेभ्यो नितरां विर
तिरिहामुत्रार्थफलभोगविरागः शमदमादयस्तु शमोदमउपरतितितिक्षासमाधानंश्रद्धा शमस्ताव
त् श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः दमो बाह्येंद्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनं नि
वर्तितानां तेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः अथवा विहितानां कर्मणां विधिनापरित्यागः ति
तिक्षा शीतोष्णादिद्वंद्वसहिष्णुता निगृहीतस्य मनसः श्रद्धा मुमुक्षुत्वं मुमुक्षुत्वं एवंभूतः प्रमाताधिकारी
शान्तो दान्त इति श्रुतेः उक्तं च प्रशान्तचित्ताय जितेंद्रियाय प्रहीणदोषाय यथोक्तकारिणे गुणान्वितायानुगता
य सर्वदा प्रदेयमेतत्सततं मुमुक्षवे इति विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं तत्रैव वेदांतानां तात्पर्यात्
संबंधस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावलक्षणः प्रयोजनं तु
तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानंदावाप्तिश्च तरति शोकमात्मवित् ब्रह्मविद्ब्रह्मैव भवति इत्यादि
श्रुतेः अयमधिकारी जननमरणादिसंसारानलसंतप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्म

श्रवणादौ तदनुगुणविषये च समाधानं ८

गुरुवेदान्तवाक्येषु विश्वासः

वेदां० सा०
२

...गुरुमनुपसृत्य तमनुसरति समित्पाणिः श्रोत्रियमित्यादिश्रुतेः स परमकृपयाध्यारोपापवादन्या
येनैनमुपदिशति तस्मै स विद्वानुपसन्नाय प्राहेत्यादिश्रुतेः असर्पभूतायां रज्जौ सर्पारोपवद्वस्तु
न्यवस्त्वारोपोऽध्यारोपः वस्तु सच्चिदानंदाद्वयं ब्रह्म अज्ञानादिसकलजडसमूहोऽवस्तु अज्ञानं तु सद
सद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभावरूपं यत्किंचिदेवं वदंति अहमज्ञ इत्यनुभवात्
देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेश्च इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्य
वह्रियते तथाहि यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः यथा जलानां समष्ट्यभि
प्रायेण जलाशय इति तथा नानात्वेन प्रतिभासमानानां जीवगतानामज्ञानानां समष्ट्यभिप्रायेण
तदेकत्वव्यपदेशः अजामेकामित्यादिश्रुतेः इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना एतदु
पहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियंतृत्वादिगुणकं सदव्यक्तमंतर्यामी जगत्कारणमीश्वर इति
च व्यपदिश्यते सकलाज्ञानावभासकत्वात् यः सर्वज्ञः सर्वविदिति श्रुतेः अस्येयं समष्टिरखिलका
रणत्वात् कारणशरीरं आनंदप्रचुरत्वात् कोशवदाच्छादकत्वाच्चानंदमयकोशः सर्वोपरमत्वा
त्सुषुप्तिः अत एव स्थूलसूक्ष्मप्रपंचलयस्थानमिति चोच्यते तदज्ञानं नानाजीवगताज्ञानाभि

राम०
२

यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति॥ तथाज्ञानस्य व्यष्ट्यभिप्रायेण हे

प्रायेण नेकत्वव्यपदेशः यथा वनस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः ✓ इन्द्रो मायाभिः पुरुरूप ते दनेकत्व
ईयत इत्यादिश्रुतेः अत्र व्यस्तसमस्तव्यापित्वेन समष्टिव्यष्टिताव्यपदेशः इयं व्यष्टिर्निकृष्टोपाधि पदेशः ज्ञान
तया मलिनसत्त्वप्रधाना एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणिकत्वात् प्राज्ञ इत्युच्यते
एकाज्ञानावभासकत्वात् अस्य प्राज्ञत्वमस्पष्टोपाधितयानतिप्रकाशत्वात् अस्यापीयमहंकारादि
कारणत्वात् कारणशरीरमानंदप्रचुरत्वात् कोशवदाच्छादकत्वाद्वेहेतोरानंदमयः कोशः सर्वोपर
मत्वात् सुषुप्तिः अत एव स्थूलसूक्ष्मशरीरप्रपंचलयस्थानमिति चोच्यते तदानीमेतावीश्वरप्रा
ज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंदमनुभवतः आनंदभुक् चेतोमुखः प्राज्ञ इत्या
दिश्रुतेः सुखमहमस्वाप्सं न किंचिदवेदिषमित्युत्थितस्य परामर्शोपपत्तेश्च अनयोः समष्टिव्यष्ट्यो
र्वनवृक्षयोरिव जलाशयजलयोरिव चाभेदः एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्ना
काशयोरिव जलाशयजलगतप्रतिबिंबाकाशयोरिव चाभेदः एष सर्वेश्वर इत्यादिश्रुतेः वनतदवच्छि
न्नाकाशयोर्जलाशयतद्गतप्रतिबिंबाकाशयोर्वाधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितच
तन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमिति चोच्यते शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते इत्यादिश्रु

वेदां० सा० ७

तेः इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सत् महावाक्यस्य वा
च्यं विविक्तं सल्लक्ष्यमिति चोच्यते अस्याज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयं आवरणश
क्तिस्तावत् अल्पोपि मेघोऽनेकयोजनमायातमादित्यमंडलमवलोकयितृनयनपथं पिधायकतया
यथाच्छादयतीव तथाज्ञानं परिच्छिन्नमप्यावरणशक्त्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयि
तृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यं तदुक्तं घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्य
ते निःप्रभं चातिमूढः तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोहमात्मा १ अनयावृत
स्यात्मनः कर्तृत्वभोक्तृत्वसुखदुःखित्वप्रमातृत्वादिसंसारसंभावनापि भवति यथा स्वाज्ञानेनावृतायां
रज्जौ सर्पत्वसंभावना भवति विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भाव
यति एवमज्ञानमपि स्वावृतात्मनि तया विक्षेपशक्त्या आकाशादिप्रपंचमुद्भावयति तादृशं सामर्थ्यं
तदुक्तं विक्षेपशक्तिर्लिंगादिब्रह्मांडांतं जगत्सृजेदिति शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधा राम० ७
नतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति यथा लूता तंतुकार्यं प्रति स्वप्रधानतया निमि

तं स्वशरीरोपाधिप्रधानतयोपादानं च भवति तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशः
आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवी चोत्पद्यते तस्माद्वा एतस्मादात्मनः आकाशः संभूतः इ
त्यादिश्रुतेः तेषु जाड्याधिक्यदर्शनात् तमःप्राधान्यं तत्कारणस्य तदानीं शब्दस्पर्शरूपरसगंधाः सत्त्व
रजस्तमांसि कारणगुणक्रमेण तेष्वाकाशादिषूत्पद्यंते एतान्येव सूक्ष्मभूतानि तन्मात्राणि अपंचीकृ
तानि चोच्यंते एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यंते सूक्ष्मशरीराण्यपि सप्तदशावय
वकानि लिंगशरीराणि अवयवास्तु ज्ञानेंद्रियपंचकं बुद्धिमनसी कर्मेंद्रियपंचकं वायुपंचकं चेति
ज्ञानेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक्
क्रमेणोत्पद्यंते बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः मनो नाम संकल्पविकल्पात्मिकांतःकर
णवृत्तिः अनयोर्बुद्धिमनसोरेव चित्ताहंकारयोरंतर्भावः एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलि
तेभ्य उत्पद्यंते एतेषां प्रकाशात्मकत्वात्सात्त्विकांशकार्यत्वं इयं बुद्धिर्ज्ञानेंद्रियैः सहिता सती विज्ञा
नमयकोशो भवति अयं ज्ञाता कर्ता भोक्ताद्यभिमानित्वेनेहलोकपरलोकगामी व्यावहारिको
जीव इत्युच्यते मनस्तु कर्मेंद्रियैः सहितं सत् मनोमयकोशो भवति कर्मेंद्रियाणि वाक्पाणिपादपायू

पंचप्राणानि एतानि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यो पृथक् क्रमेणोत्पद्यंते वायवः प्राणापान
व्यानोदानसमानाः प्राणो नाम प्राग्गमनवान् नासाग्रस्थानवर्ती अपानो नाम अवाग्गमनवान् पाय्वादि
स्थानवर्ती व्यानो नाम विष्वग्गमनवान् अखिलशरीरवर्ती उदानः ऊर्द्ध्वगमनवान् कंठस्थानवर्ती उ
त्क्रमणवायुः समानः शरीरमध्यगताशितपीतान्नपानादि समीकरणकरः केचित्तु नागकूर्मकृकलदेवदत्त
धनंजयाख्याः पंच अन्यवायवः संतीति वदंति तत्र नाग उद्गिरणकरः कूर्म उन्मीलनकरः कृकलः क्षुधा
करः देवदत्तो जृंभणकरः धनंजयः पोषणकरः एतेषां प्राणादिष्वंतर्भावात् प्राणादयः पंचैवेति केचित् ए
तत्प्राणादिकं पंचकम् आकाशादिगतरजोंशेभ्यो मिलितेभ्यः उत्पद्यते तत्रायं क्रमः आकाशात् श्रोत्रवा
चौ वायोस्त्वक्पाणी तेजसश्चक्षुःपादौ अद्भ्यो जिह्वोपस्थौ पृथिव्या घ्राणपायू इंद्रिये इदं प्राणादिपंचकं क
र्मेंद्रियैः सहितं सत् प्राणमयः कोशो भवति अस्य क्रियात्मकत्वेन रजोंशकार्यत्वं एषु कोशेषु मध्ये विज्ञा
नमयकोशो ज्ञानशक्तिमान् कर्तृरूपः मनोमयकोश इच्छाशक्तिमान् करणरूपः प्राणमयः कोशः क्रिया
शक्तिमान् कार्यरूपः योग्यत्वादेवमेतेषां विभाग इति वर्णयंति एतत्कोशत्रयं मिलितं सत् सूक्ष्मशरी
रमिति चोच्यते अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः अनेकबु

द्रे विषयतया रूढो वनजलवद्वा व्यष्टिरिति च भवति एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राण इ
ति चोच्यते सर्वत्रानुस्यूतत्वात् ज्ञानक्रियाशक्तिमदुपहितत्वाच्च अस्यैषा समष्टिः स्थूलशरीरलयस्थान
मिति चोच्यते एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति तेजोमयान्तःकरणोपहितत्वात् अस्यापीयं व्यष्टिः
स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वा
त्स्वप्नः स्थूलशरीरलयस्थानमिति चोच्यते एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयान
नुभवतः प्रविविक्तभुक् तैजस इत्यादिश्रुतेः अत्रापि व्यष्टिसमष्ट्योस्तदुपहितसूत्रात्मतैजसयोश्च वन
वृक्षवत्तदवच्छिन्नाकाशवत् जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्चाभेदः एवं सूक्ष्मशरीरोत्पत्तिः
स्थूलभूतानि पंचीकृतानि पंचीकरणं तु आकाशादिपंचस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथ
मिकान् पंचभागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयभागपरित्यागेन भागांत
रेषु संयोजनं तदुक्तं द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः स्वस्वेतरद्वितीयांशयोजनात्पंच पंच चेति
अस्याप्रामाण्यं नाशंकनीयं त्रिवृत्करणमिति श्रुतेः पंचीकरणस्याप्युपलक्षणत्वात् पंचानां पंचात्म
कत्वे समानेऽपि वैशेष्यात्तद्वाद इति न्यायेनाकाशादिव्यपदेशः संभवति तदानीमाकाशे शब्दोऽभिव्यज्य

वेदां. सा.
५

ते वायोः शब्दस्पर्शौ अग्नेः शब्दस्पर्शरूपाणि अप्सु शब्दस्पर्शरूपरसाः पृथिव्यां शब्दस्पर्शरूपरसगंधा
श्च एतेभ्यः पंचीकृतेभ्यो भूर्भुवः स्वर्महर्जनतपःसत्यमित्येतन्नामकानामुपर्युपरि विद्यमानानाम् अ
तलवितलसुतलरसातलतलातलमहातलपातालनामकानामधोऽधो विद्यमानानां लोकानां
ब्रह्मांडस्य तदंतर्वर्ति चतुर्विधस्थूलशरीराणामन्नपानादीनां चोत्पत्तिर्भवति शरीराणि तु जरा
युजांडजस्वेदजोद्भिज्जाख्यानि जरायुजाख्यानि जरायुभ्यो जातानि मनुष्यपश्वादीनि अंडजानि
अंडेभ्यो जातानि पक्षिपन्नगादीनि स्वेदजानि स्वेदाज्जातानि यूकामशकादीनि उद्भिज्जानि भूमिमु
द्भिद्यजातानि कदरदादीनि अत्रापि चतुर्विधस्थूलशरीरमेकानेकबुद्धिविषयतया वनवद्वा
जलाशयवद्वा समष्टिः वृक्षवज्जलवद्वा व्यष्टिरपि भवति एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो वि
राडित्युच्यते सर्वनराभिमानित्वात् एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते सूक्ष्मशरीराभिमान
परित्यज्य स्थूलशरीरादिप्रविष्टत्वात् अस्याप्येषा स्थूलशरीरमन्नविकारित्वादेव हेतोरन्नम
यकोशो जाग्रदिति चोच्यते तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियंत्रितेन रघु° ५
दानींद्रियपंच॥ वागादींद्रियपंचकेन क्रमाद्वचनादानगमनविसर्गानंदान् वंअचतुर्मुखवंक

श्रोत्रादींद्रियपंचकेन क्रमाच्छब्दस्पर्शरूपरसगंधान् अग्नींद्रोपेंद्रयमप्रजापतिभिः
क्रमान्नियंत्रितेन ॥१॥

सम्भूतैः क्रमात् तिर्यक्त्रिते नभसो कुम्भाहंकार विनाशो योनो तरिरिंद्रियचतुः केन क्रमात् संकल्पविक
ल्पनिश्चयाहंकारचैतारवंसास्थ सर्वानेतान् स्थूलविषयानुभवते: जागरितस्थानेयपहि:प्राज्ञइ
त्यादिश्रुतेः अनयोः स्थूलव्यष्टिसमष्ट्योरुपहितयोर्विश्ववैश्वानरयोर्वनवृक्षवत्त
दवच्छिन्नाकाशवज्जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्च पूर्ववदभेदः एवं पंचीकृतभूते
भ्यः स्थूलप्रपंचोत्पत्तिः एषां स्थूलसूक्ष्मकारणप्रपंचानामपि समष्टिः एको महान् प्रपं
चो भवति यथावान्तरवनानां समष्टिः एकं महद्वनं यथावान्तरजलाशयानां समष्टिरेको महाजलाश
यः एतदुपहितं चैतन्यं विश्ववैश्वानरादिईश्वरचैतन्यमपि अवान्तरवनावच्छिन्नाकाशवन्महा
वनाकाशवत् अवान्तरजलाशयप्रतिबिंबाकाशवच्चैकमेव आभ्यां महाप्रपंचतदुपहितचैतन्याभ्यां
तप्तायःपिंडवत् एवं वस्त्वन्यवस्त्वारोपः सामान्येन दर्शितः इदानीं प्रत्यगात्मनि इदमिदमयमारो
पयतीति विशेषत उच्यते अयं प्राकृतजनः आत्मा वै पुत्रनामासीत्यादिश्रुतेः स्वस्मिन्निव पुत्रेपि प्रेमदर्श
नात् पुत्रे पुष्टे नष्टे अहमेव पुष्टो नष्टश्चेत्यनुभवाच्च पुत्र आत्मेति वदति चार्वाकस्तु स एष पु
रुषोऽन्नरसमय इत्यादिश्रुतेः प्रदीप्तगृहात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमनदर्शनात्

दीदिवकं सदुपहितं
चैतन्यं सर्व भुज
चैतन्य स्वलिवदं ब्र
ह्म महावाक्य
वंविवकं सत्त्व
ज्ञातीयं भवति ४

वेदां· सा·
६

स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति अपरश्चार्वाकस्तेह प्राणाः प्रजाप
तिं पितरमेत्य ब्रूयुरित्यादिश्रुतेः इंद्रियाणामभावे शरीरचलनाभावात् काणोऽहं बधिरोऽहमित्याद्यनु
भवाच्च इंद्रियाण्यात्मेति वदति अपरश्चार्वाकस्तु अन्योंतर आत्मा प्राणमय इत्यादिश्रुतेः प्रा
णाभावे इंद्रियादिचलनाभावादहमशनायावानहं पिपासावानित्याद्यनुभवाच्च प्राण आत्मेति व
दति अन्यस्तु चार्वाकः अन्योंतर आत्मा मनोमय इत्यादिश्रुतेः मनसि सुप्ते प्राणादेरभावात् अहं
संकल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति बौद्धस्तु अन्योंतर आत्मा विज्ञा
नमय इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्त्यभावात् अहं कर्ताहं भोक्तेत्याद्यनुभवाच्च
बुद्धिरात्मेति वदति प्राभाकरतार्किकौ अन्योंतर आत्मानंदमय इत्यादिश्रुतेः बुद्ध्यादीनाम
ज्ञाने लयदर्शनात् अहमज्ञोऽहमज्ञानीत्याद्यनुभवाच्च अज्ञानमात्मेति वदतः भाट्टस्तु
प्रज्ञानघन एवानंदमय इत्यादिश्रुतेः सुषुप्तौ प्रकाशाभावादहमज्ञो महं न जानामीत्य
नुभवाच्च अज्ञानोपहितं चैतन्यमात्मेति वदति अपरो बौद्धः असदेवेदमग्र आसीदित्यादिश्रुतेः सुषु राम·
प्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमा ६

त्मेतिवदति एतेषां पुत्रादीनां मृत्यपर्यंतानामनात्मत्वमुच्यते एतैरेव ग्रन्थैरेतादृशैः स्तैः पुत्राति
पुत्रस्यानुभवाभासैः पुत्रदेहं दृष्ट्वा तत्रापि पुत्रस्यानुभवाभासानामुत्तरोत्तरोत्तरमिति युक्त्यनुभवाभासैः
बाधदर्शनात् पुत्रादीनामनात्मत्वं तत्स्वरूपमेव किंच प्रत्यगात्मा स्थूलोऽहं चक्षुरप्राणोऽहमनोऽह
न्तो चेतनं चिन्मात्रं सदित्यादि प्रबलश्रुतिविरोधादस्य पुत्रादिमृत्यपर्यंतस्य जडस्य चैतन्यस्य
भासत्वेन घटादिवदनित्यत्वात् अहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासा
नां बाधितत्वादपि पुत्रादिमृत्युपर्यंतमखिलमनात्मैव अतस्तत्तद्भासकं नित्यशुद्धबुद्धमुक्तस
त्यस्वभावं प्रत्यक्चैतन्यमेवात्मतत्वमितिवेदांतविद्वत् दसमसत्ताकसन्यथाभावः विवर्तः सत्ता
त्रिविधा व्यावहारिकी प्रातिभासिकी पारमार्थिकी चेति अनुभवः एकस्याध्यारोपः अपवादो नाम र
सर्पस्य ज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्तस्याऽवस्तुनोऽज्ञानादेः प्रपंचस्य वस्तुमात्रत्वं त
थाहि तदुपाय तत्र चतुर्विधस्थूलशरीरजातं भोग्यरूपान्नादिकमेतदायतनभूतं भूरादिचतु
र्दशभुवनानि एतदायतनभूतं ब्रह्मांडं चैतत्सर्वमेतेषां कारणभूतं पंचीकृतभूतमात्रं भवति
एतानि शब्दादिविषयसहितानि पंचीकृतजातानि सूक्ष्मशरीरजातं तत्सर्वमेतेषां कारणभूत
तमपंचीकृतभूतमात्रं भवति एतानि सत्वादिगुणसहितानि अपंचीकृतान्युत्पत्तिव्युत्क्रमेणैत

वे॰ सा॰ कारणभूताज्ञानोपहितं चैतन्यमभिन्नं भवति एतदुपहितं सर्वमज्ञानोपहितं चैतन्यं चेश्वरादिकं
७ एतदाधारभूतानुपहितं चैतन्यं तुरीयं ब्रह्मसमाख्यं भवति अत्राध्यारोपापवादाभ्यां तत्त्वं
पदार्थशोधनमपि सिद्धं भवति तथाहि अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं
चैतन्यमेतदनुपहितं चैतन्यं त्रितयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति ए
तदुपाध्युपहिताधारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति अज्ञानादिव्यष्टिरेतदुप
हिताल्पज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितं चैतन्यं त्रितयं तप्तायःपिण्डवदेकत्वेनावभासमानं त्वंप
दवाच्यार्थो भवति एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वंपदलक्ष्या
र्थो भवति अथ महावाक्यार्थो वर्ण्यते इदं तत्त्वमसि वाक्यं संबंधत्रयेणाखण्डार्थबोधकं भवति
संबंधत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मलक्षण
योर्लक्ष्यलक्षणभावश्चेति तदुक्तं सामानाधिकरण्यं च विशेषणविशेष्यता लक्ष्यलक्षणसंबंधः राम॰ ७
पदार्थप्रत्यगात्मनामिति सामानाधिकरण्यसंबंधस्तावत् यथा सोऽयं देवदत्त इति अस्मिन्वाक्ये
तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मि

न्पिंडे तात्पर्यसंबंधः तथा तत्त्वमसि वाक्येपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्याप
रोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्य चैकस्मिंश्चैतन्ये तात्पर्यसंबंधः विशेषणविशे
ष्यभावसंबंधस्तु यथा तत्रैव वाक्ये सशब्दार्थः तत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्काल
विशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः तथात्रापि वाक्ये तत्पदा
र्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्याव
र्तकतया विशेषणविशेष्यभावः लक्ष्यलक्षणसंबंधस्तु यथा तत्र सशब्दायंशब्दयोस्तदर्थयो
र्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः त
थात्रापि तत्त्वंपदयोः तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनावि
रुद्धचैतन्येन सह लक्ष्यलक्षणभावः इयमेव भागलक्षणेत्युच्यते अस्मिन्वाक्ये नीलमुत्पल
मिति वाक्यवत् वाक्यार्थो न संगच्छते तत्र तु नीलपदार्थनीलगुणस्य उत्पलपदार्थोत्पलद्र
व्यस्य च शौक्ल्यपटादिभेदव्यावर्तकतयान्योन्यविशेषणविशेष्यभावसंसर्गस्यान्यतरविशि
ष्टस्यान्यतरस्य वा तदैक्यस्य वा वाक्यार्थस्यांगीकारे प्रमाणांतरविरोधाभावात् वाक्यार्थः संगच्छ

Vedanta sara incomplete 851

वे॰ सा॰ ८

ते अत्र तु तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभे
दव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य वा तदैक्यस्य वा वाक्या
र्थत्वांगीकारेण प्रत्यक्षादिप्रमाणविरोधाद्वाक्यार्थो न संगच्छते अत्र तु गंगायां घोषः प्रतिवसतीति
वाक्यवज्जहल्लक्षणा न संगच्छते अत्र गंगाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो
विरुद्धत्वाद्वाक्यार्थमशेषतः परित्यज्य तत्संबद्धतीरलक्षणाया युक्तत्वाज्जहल्लक्षणा संगच्छते अ
त्र तु परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रविरोधाद्भागांतरमपि परित्यज्यान्यल
क्षणाया अयुक्तत्वाज्जहल्लक्षणा न संगच्छते न च गंगापदं स्वार्थपरित्यागेन यथा तीरपदार्थं लक्ष
यति तथा तत्पदं त्वंपदं वा स्वार्थपरित्यागेन तत्पदार्थं त्वंपदार्थं वा लक्षयतु अतः कुतो जहल्लक्षणा
न संगच्छते इति वाच्यं तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वं ॥
पदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावा
त् अत्र शोणो धावतीति वाक्यवदजहल्लक्षणापि न संभवति तत्र शोणगुणगमनलक्षणस्य वा राम॰
क्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधपरिहारसंभवात् अत्र ८

209